४. कुशकण्डी विधि:- पत्र. 4. पू०

1389

9"x 4.5"

॥ अथ कुशकण्डी विधिः ॥

१ श्रीगणेशाय नमः अथ कुशकंडिका लिख्यते अथ यजमानः सुस्ना
नः सुप्रक्षालितपाणिपादः स्वचांतः कर्मस्थानमागम्य वरुणादिप
ज्ञिप० वृक्षोद्भवासने प्रागग्रान्वाग्नीन्कुशान् दत्वा प्राङ्मुख उपवि
श्य वाग्यतः शुद्धायां भूमौ समप्रविंशत्यंगुलमंडलं परिलिख्य
परिशमूह्य त्रिभिर्दर्भैः प्राचः पांशूनपसार्य उपलिप्य गो
मयोदकेन उल्लिख्य खादिरेण हस्तमात्रेणखड्गाकृतिना स्फ्ये
न उल्लिख्य प्रागग्राउदक्संस्थाः स्थंडिलपरिमाणास्तिस्रो
रेखाः कृत्वा उद्धृत्य अनामिकांगुष्ठाभ्यां पयोल्लिताभ्यां रेखाभ्यः
पांशूनुद्धृत्य अभ्युक्ष्य मणिकाद्भिरभ्युक्ष्याभिषिच्य अग्नि १

मुपसमाधाय कर्मसाधनभूतं लौकिकं स्मार्त्तं श्रौतं वाग्निमा
त्माभिमुखं स्थापयित्वा दक्षिणतो ब्रह्मासनमास्तीर्य्य तस्मा
ग्रे दक्षिणशय्यादि शिवब्रह्मणो आसनं वरणादि पश्चिमपदार्थनिर्मि
तं पीठमास्तीर्य्य कुशैस्तत्वा तत्र वरणाभरणाभ्यां पूर्वं संपा
दितं कर्मसु तत्वशं ब्राह्मणं तदभावे पंचाशत्कुशनिर्मितं अग्नेरु
त्तरतः प्राङ्मुखमासीनं स्वयमुदङ्मुख आसीनोऽनुलेपनपुष्पा
माल्यवस्त्रालंकारादिभिः संपूज्यामुककर्माहं करिष्ये तत्र मे त्वं
ममुकगोत्रामुकशर्मन् ब्राह्मण ब्रह्मा भव इति वृत्वा अहं भवामी
त्युक्तो वेदनमुपवेश्य प्रणीय अप इति शेषः तद्यथा अग्नेरुत्त

रतः प्रागग्रकुशैरासनद्वयं कल्पयित्वा वारणं द्वादशाङ्गुलदीर्घं चतुर
ङ्गुलविस्तारं चतुरङ्गुलखातं चमसं सव्यहस्ते कृत्वा दक्षिणहस्तो
द्धृतपात्रस्थोदकेन पूरयित्वा पश्चिमासने निधायालभ्य पूर्वास
ने स्थापयित्वा परिस्तीर्याग्निम् बर्हिर्मुष्टिमादाय पर ईशानादि
प्रागग्रैर्बर्हिभिरुदक्संस्थमग्नेः परिस्तरणं कृत्वा अर्थवदासा
घ पावद्भिः पदार्थैरर्थैः प्रयोजनं तावतः पदार्थान् द्वन्द्वं प्राचोउद
गग्रान् अग्नेरुत्तरतः पश्चाद्वासाद्य नयथा पवित्रच्छेदनानि
त्रीणि कुशतरुणानि पवित्रे द्वे साग्रे अनन्तरगर्भे द्वे कुशतरुणे
प्रोक्षणीपात्रं वारुणं करतलसंमितखातं पद्मपत्राकृति कमलं 

मुकलाकृतिर्वा आज्यस्थाली तैजसी मृण्मयी वा द्वादशांगुलवि
शाला प्रादेशमात्रोच्चा तथैव चरुस्थाली संमार्गकुशास्त्रयः उपय
मनकुशास्त्रिप्रभृतयः समिधास्त्रयः प्रादेशमात्राः स्रुवः खा
दिरो वा हस्तमात्रोंगुष्ठपर्वमात्रखातपरिणाहवर्त्तुलपुष्करः आ
ज्यं गव्यं चरुश्चेत् व्रीहितंडुलाः षट्पंचाशदधिकमुष्टिशत
द्वयपरिमितं परार्द्धं वहुभोक्तृपुरुषाहार परिमितमवरार्द्धं त
न्मितं तंडुलाद्यन्नपूर्णपात्रम् दक्षिणा वरो वा यथाशक्ति हिर
ण्यादि द्रव्यम् पवित्रे छित्वा प्रथमं त्रिभिः कुशतरुणैरग्रतः प्रा
देशमात्रं विहाय द्वे कुशतरुणे प्रच्छिद्य प्रोक्षणीसंस्कृत्य प्रो

३ क्षणीपात्रं प्रणीतासंनिधौ निधाय तत्रपात्रान्तरेण हस्तेन वा
प्रणीतोदकमासिच्य पवित्राभ्यामुत्पूय पवित्रे प्रोक्षणीषु नि
धाय दक्षिणहस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये कृत्वा तदुदकं
दक्षिणेनोच्छाल्य प्रणीतोदकेन प्रोक्ष्य अर्थवत्प्रोक्ष्य अर्थ
वंति प्रयोजनवंति आज्यस्थाल्यादीनि पूर्णपात्रपर्यंतानि प्रो
क्षणीभिरद्भिरासादनक्रमेणैकैकशः प्रोक्ष अर्थवत्प्रोक्ष्य
अर्थवन्ति प्रयोजनवंति आज्यस्थाल्यादीनि पूर्णपात्रपर्यंता
नि प्रोक्षणीभिरद्भिरासादनक्रमेणैकैकशः प्रोक्ष्य असंचरे प्रो
क्षणीपात्रं समपवित्रं निधाय निरूप्याज्यं आसादितमाज्यप ३

अथाग्नेर्निर्हतायामाज्यस्थाल्यां प्रक्षिप्य चरुश्चेत् चरुस्थाल्यां
प्रणीतोदकमासिच्यासादितांस्तण्डुलान् प्रक्षिप्य अधिश्रित्य
तथाज्यं ब्रह्माधिश्रयति तदुत्तरतः स्वयं चरुमेवं युगपदग्नावा
रोप्य पर्य्यग्निं कुर्यात् ज्वलदुल्मुकं प्रदक्षिणमाज्यचर्वोः स
मन्तात् भ्रमयेत् स्रुवं प्रतप्य दक्षिणहस्तेन स्रुवमादाय प्राञ्चम
धोमुखमग्नौ तापयित्वा संमृज्य दक्षिणहस्तेन संमार्गाग्रैर्मू
लतोऽग्रपर्यन्तं संमृज्य मूलैरग्रमारभ्याधस्तान्मूलपर्यन्तम् अ
भ्युक्ष्य प्रणीतोदकेनाभिषिच्य संमृज्य पुनः पूर्ववत् प्रतप्य
दक्षिणतो निदध्यात् आज्यमुत्थाप्य चरोः पूर्वेणानीता अ

४

ग्नेरुत्तरतः संस्थाप्य चरुमुत्थाप्य आज्यस्य पश्चिमतो नीत्वा
आज्यस्योत्तरतो निधाय आज्यमग्नेः पश्चादानीय चरु
चानीय आज्यस्योत्तरतो निधाय एवंचतुरादीन्यन्यान्य
पि हवींष्युद्वासयेदधिश्रितानानुपूर्व्येणोद्वासितानानुउ
त्तरतो हविष उद्वासनपनमिति पाशिका संप्रदायात्॥
उत्पूय पूर्ववत्पवित्राभ्यामुत्पूय अवलोक्याज्यं अपद्रव्य
निरस्य प्रोक्षणीश्च पूर्ववत्पवित्राभ्यामुत्पूय उपयम
नकुशानादाय दक्षिणेन पाणिना गृहीत्वा सव्ये निधा
य समिधोभ्याधाय तिष्ठन् समिधा प्रक्षिप्य पर्युक्ष्य ४

५ जुहुयात् प्रोक्षणुदकेन सपवित्रेण दक्षिणाचुलुकगृही
तेनाग्निमीशानादि उदकपर्यंतं परिषिच्य जुहुयादाघा
रादीन् संस्रवधारणार्थं पात्रं प्रणीतान्मोर्मध्ये निदध्यात्
एषएवविधिर्यत्रक्वचिद्धोमः एषः परिसमूहनादिपर्यु
क्षणपर्यंतोविधिरेवनमंत्राः यत्रक्वचनलौकिकेस्मार्तेश्रौ
तेवाग्नौहोमस्तत्रवेदितव्यः आवसथ्याधानंदारकाले॥
इतिकुशकंडिकासमाप्तम् संवत १८४१ आषाढमासे
शुक्लपक्षेद्वितीयायांबुधौलिखिताविश्वेश्वरगंगापुत्रेण॥ ५

॥ इति कुश कण्डिका विधिः ॥